खेत्। गिरिका ४ बालमूषिका ५। नेङ्टे इन्दुर
इति भाषा। इत्यमरः॥ मूषकः ६ मूषः ७ मूषीकः
८ उन्दूरुः ९ खनकः १० वभ्रुः ११ वृषः १२ आ-
खनिकः १३ वृषुः १४ दीना १५ मुषीका १६।
मूषा १७ मूषीका १८ मूषिका १९। इति
शब्दरत्नावली॥ बिलेशयः २० सुषिरः २१
इन्दूरः २२। इति जटाधरः॥ क्षुद्रस्य तस्य पर्य्यायः।
चिक्कः २३ वेश्मनकुलः २४ चिक्का २५। इति च
शब्दरत्नावली॥ छालाछला २६ अञ्जनिका २७।
इति जटाधरः॥

उन्दुरुः, पुं, (उन्द + बाहुलकात् ऊरुः।) मूषिकः।
इति हेमचन्द्रः॥
("उन्दुरुचान्तररहितं तेन वातघ्नकल्कवत्"॥
इति वाभटे चिकित्सास्थाने नवमेऽध्याये॥)

उन्दुरुकर्णी, स्त्री, (उन्दुरोः मूषिकस्य कर्णाविव पर्णा-
न्यस्याः। उन्दुरुकर्ण + ङीष्।) आखुकर्णीलता।
इति राजनिर्घण्टः॥

उन्नः, त्रि, (उन्द + क्त। नुदविदेति पक्षे नत्वम्।)
क्लिन्नः। दयापरः। इति हेमचन्द्रः॥

उन्नतः, त्रि, (उत् + नम + क्त।) वर्द्धितः। तत्पर्य्यायः।
उच्चः २ प्रांशुः ३ उदग्रः ४ उच्छ्रितः ५ उत्तुङ्गः ६।
इत्यमरः॥ उच्चैः ७। इति शब्दरत्नावली॥ तुङ्गः ८।
इति जटाधरः॥ (यथा, रघुः। १। १५। "स्थितः
सर्व्वोन्नतेनोर्व्वीं क्रान्त्वा मेरुरिवात्मना"॥ स्त्री,
दिनपरिमाणज्ञानसाधनं उपायः। यथा सिद्धा-
न्तशिरोमणौ। "दिवसस्य यद्गतं यच्च शेषं तयोर्य-
दल्पं तदुन्नतसंज्ञं ज्ञेयम्"। (पुं, चाक्षुषमन्वन्तरे
ऋषिभेदः। यथा, मार्कण्डेये ७६।५४।
"सुमेधा विरजाश्चैव हविष्मानुन्नतो मधः।
अतिनामा सहिष्णुश्च सप्तासन्निति चर्षयः"॥)

उन्नतनाभिः, त्रि, (उन्नतो नाभिः यस्य।) उच्चनाभि-
युक्तः। तत्पर्य्यायः। तुन्दिः २। इति हलायुधः॥

उन्नतानतं, त्रि, (उन्नतञ्च तत् आनतञ्चेति।) उच्च-
नीचस्थानादि। तत्पर्य्यायः। बन्धुरम् २। इत्यमरः॥

उन्नतिः, स्त्री, (उत् + नम + क्तिन्।) गरुड़भार्य्या।
समृद्धिः। ("वक्षोजौ करिकुम्भविभ्रमकरीमत्यु-
न्नतिं गच्छतः"। इति साहित्यदर्पणे॥ ३ य
परिच्छेदे।) उदयः। इति हेमचन्द्रः॥ (यथा,
सिद्धान्तशिरोमणौ।
"मासान्तपादे प्रथमेऽथवेन्दोः
शृङ्गोन्नतिर्यद्दिवसेऽवगम्या।
तदोदयस्ते निशि वा प्रसाध्यः
शशुर्विधोः स्वोदितनाड़िकाद्यैः"॥)

उन्नतीशः, पुं, (उन्नत्यास्तदाख्यया प्रसिद्धाया गरुड़-
पत्न्याः ईशः स्वामी।) गरुड़पक्षी। इति त्रि-
काण्डशेषः॥

उन्नमितः, त्रि, (उत् + नम् + णिच् + क्त।) उत्तो-
लितः। उर्द्धीकृतः। इति श्रीधरस्वामी॥
("अथ प्रयत्नोन्नमितानमत्फणै-
र्धृते कथञ्चित् फणिनां गणैरधः"॥
इति माघे। १। १४॥)

उन्नयः, पुं, (उन्नयनम्। उत् + नी + क्वचिदपवाद-
विषयेऽप्युत्सर्गोऽभिनिविशते इति एरच्।) ऊर्द्ध-
नयनम्। इत्यमरः॥

उन्नयनं, क्ली, (उत् + नी + ल्युट्।) वितर्कः। इति
हेमचन्द्रः॥ ऊर्द्धप्रापणम्। उत्तोलनम्। तोलन
उठान इत्यादि भाषा॥
(यथा, कात्यायने। २२।१०।५।
"तेष्वेवोन्नयनमभ्यभि सोमानुन्नयन्तीति श्रुतेः,"।
उदूर्द्धे नयनं यस्येति वाक्ये वाच्यलिङ्गः"॥)

उन्नायः पुं, (उन्नयनं इति। उत् + नी + घञ्।)
उन्नयनम्। इत्यमरः॥ (यथा भट्टिः। ७। ३७।
"उन्नायानधिगच्छन्तः प्रज्ञावैर्वसुधाभृताम्"॥)

उन्नाहं, क्ली, (उत् + नह + घञ्।) काञ्जिकम्।
इति हेमचन्द्रः॥

उन्निद्रः, त्रि, (उद्गता निद्रा स्वप्नो दुःखादिकं वा
यस्मात्।) प्रफुल्लः। विकसितः। इति हेमचन्द्रः॥
("उन्निद्रपुष्पचनचम्पकपुष्पभासाः"।
इति माघः। प्रबुद्धः। शयनादुत्थितः।
"तामुन्निद्रामवनिशयनां सौधवातायनस्थः"।
इति मेघदूते। ८८। तथा, शाकुन्तले षष्ठाङ्के।
"शय्याप्रान्तविवर्त्तनैर्विगमयत्युन्निद्र एव क्षपाः"॥)

उन्भ प श पूर्त्तौ। (तुदां + परं + सकं + सेट्।)
रुखादिः। प श उम्भति कुम्भं जलेन लोकः।
उम्भामास। इति दुर्गादासः॥

उन्मत्तः, त्रि, (उत् + मद + क्त।) उन्मादयुक्तः।
वायुकृतचित्तविभ्रमविशिष्टः। पागल इति भाषा।
तत्पर्य्यायः। उन्मादवान् २। इत्यमरः॥ तस्यौ-
षधम्, यथा,—गारुड़े १९९ अध्यायः॥ *॥
"कूर्म्ममत्स्याखुमहिषगोशृगालाश्च वानराः।
विड़ालबर्हिकाकाश्च वराहोलूककुक्कुटाः॥
हंस एषाञ्च विण्मूत्रं मांसं वा रोमशोणितम्।
धूमं दद्याज्ज्वरार्त्तस्य उन्मत्तेभ्यश्च शान्तये॥
एतान्यौषधजातानि धूपितानि महेश्वर।
निहन्ति ज्वरमुन्मादं वृत्तमिन्द्राशनिर्यथा"॥
("तमात्मनो हतमुपघ्नन्तो देवादयः कुर्व्वन्त्यु-
न्मत्तम्"। इति निदानस्थाने सप्तमेऽध्याये।
"देवर्षिपितृगन्धर्व्वैरुन्मत्तस्य च बुद्धिमान्।
वर्जयेदञ्जनादीनि तीक्ष्णानि क्रूरकर्म्म च॥
सर्पिष्पानादि तस्येह मृदुभैषज्यमाचरेत्"॥
इति च चिकित्सास्थाने १४ अध्याये चरकेणोक्तम्॥
अन्यद्विवरणमस्योन्मादशब्दे ज्ञेयम्॥)
तद्वाक्यप्रामाण्यं यथा,—मलमासतत्त्वे॥
"उन्मत्तानाञ्च या गाथा शिशूनां चेष्टितं च यत्।
स्त्रियो यच्च प्रभाषन्ते नास्ति तत्र व्यतिक्रमः॥
आदौ गच्छति देवेषु पश्चात् गच्छति मानुषान्।
नादेशिता वाग्वदति सत्या ह्येषा सरस्वती"॥

उन्मत्तः, पुं, (उन्मत्तयति। उन्मत्त + तत्करोतीति
णिच् + पचाद्यच्।) धुस्तूरः। यथा,—
("श्वेतोन्मत्तस्योत्तरदिङ्मूलसिद्धस्तु पायसः।
गुड़ाज्यसंयुतो हन्ति सर्व्वोन्मादांश्च दोषजान्"॥
इति वैद्यकचक्रपाणिसंग्रहे उन्मादाधिकारे॥)
मुचुकुन्दवृक्षः। इति मेदिनी॥

उन्मदः, त्रि, (उद्गतो मदो यस्य।) उन्माद-
युक्तः। उद्गतमदः। तत्पर्य्यायः। उन्मदिष्णुः २।
इत्यमरः॥ ("उदीरयामासुरिवोन्मदानाम्"॥
इति रघुः। २। ९। तथा, माघे ६।२९॥
"मधुकराङ्गनया मुहुरुन्मद-
ध्वनिभृता निभृताक्षरमुज्जगे"॥)

उन्मदिष्णुः, त्रि, (उत् + मद + इष्णुच्।) उन्मदः।
उन्मादशीलः। इत्यमरः॥

उन्मनाः, [स्] त्रि, (उद्गतं उत्कण्ठितं मनो यस्य।)
उत्कण्ठितचित्तः। तत्पर्य्यायः। उत्कः २। इत्यमरः॥
("उन्मनाः प्रथमजन्मचेष्टिता-
न्यस्मरन्नपि बभूव राघवः"।
इति रघुः। ११। २२। "पयोधरेणोरसि काचि-
दुन्मनाः"॥ इति किराते। ८। १९॥)

उन्मन्थः, पुं, (उत् + मथि + घञ्।) मारणम्।
वधः। इति हेमचन्द्रः॥

उन्माथः, पुं, (उन्मथ्यतेऽनेनेति। उत् + मथ + घञ्।
मारणादिपक्षे भावे घञ्।) कूटयन्त्रम्। मृग-
बधोपयुक्तयन्त्रम्। आमिषं दत्त्वा मृगपक्षिबन्ध-
नार्थं यत् सन्धानयन्त्रं निवेश्यते सः। इत्यमरः॥
मारणम्। घातकः। इति मेदिनी॥
(यथा, प्रबोधचन्द्रोदये।
"प्रभो महाशानां क इव भुवनोन्माथविधिषु"॥)

उन्मादः, पुं, (उत् + मद + घञ्। (महादेवः।
यथा महाभारते। महादेवसहस्रनामकथने १३
१७। ९९॥ "उन्मादो मदनः कामो ह्यश्वत्थोऽर्थ-
करो यशः"।) वातिकरोगविशेषः। तत्पर्य्यायः।
चित्तविभ्रमः २। इत्यमरः॥ मतिभ्रंशः ३ उन्मना:
४। इति राजनिर्घण्टः॥ (चित्तविप्लवः ५२।२३४।
इति हेमचन्द्रः॥) मानसरोगविशेषः।
तस्यौषधं यथा,—
"वचा त्रिकटुकञ्चैव करञ्जं देवदारु च।
मञ्जिष्ठा त्रिफला श्वेता शिरीषो रजनीद्वयम्॥
प्रियङ्गुनिम्बत्रिकटु गोमूत्रेणावघर्षितम्।
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनम् तथा॥
अपस्मारविषोन्मादशोषालक्ष्मीज्वरापहम्।
भूतेभ्यश्च भयं हन्ति राजद्वारे च शासनम्"॥
इति गारुड़े १९९ अध्यायः॥ *॥ अथ उन्मादा-
धिकारः॥ तत्र उन्मादस्य निरुक्तिमाह।
"मदयन्त्युद्धता दोषा यस्मादुन्मार्गमाश्रिताः।
मानसोऽयमतो व्याधिरुन्माद इति कीर्त्तितः"॥
अयमर्थः। यस्माद्धेतोरुद्धताः प्रवृद्धा दोषाः
उन्मार्गमाश्रिताः मदयन्ति चित्तं विक्षिपन्त्य-
स्मिन्। अतोऽयमुन्माद इति कीर्त्तितः। सः
उन्मादः मानसो व्याधिः मनोवैकृत्यकरणात्॥*॥
तस्यैवावस्थाभेदेन नामान्तरमाह। स चाप्रवृद्ध-
स्तरुणो मदसंज्ञां बिभर्त्ति च। स उन्मादस्तरुणो
नवीनः॥ *॥ उन्मादस्य विप्रकृष्टनिदानमाह।
"विरुद्धदुष्टाशुचिभोजनानि
प्रधर्षणं देवगुरुद्विजानाम्।
उन्मादहेतुर्भयहर्षपूर्व्वो
मनोऽभिघातो विषमाश्च चेष्टाः॥"
दुष्टं धत्तूरबीजादिसहितम्। अशुचि रजस्वलादि-